# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-3)(New)** | **प्रश्नपत्रम् – 5** | गुणाः –70 |
| विषयः – साहित्यम् | **कोड –C.E.5.3.3** | समयः- 3 तः 6 पर्यन्तम् |
| दिनाङ्कः –14/10/2019 | सन्दर्भग्रन्थः – हर्षचरितम् (उच्छवासः -१) | |

**प्र. क्र.** **प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ निम्नलिखिताभ्यां श्लोकाभ्याम् कस्याप्येकस्य श्लोकस्य ससन्दर्भं व्याख्यां कुरु।** ५

१ हरकण्ठग्रहानन्दमीलिताक्षीं नमाम्युमाम् ।
कालकूटविषस्पर्शजातमूर्च्छागमामिव ॥

२ उच्छवासान्तेऽप्यखिन्नास्ते येषां वक्त्रे सरस्वती ।
कथमाख्यायिकाकारा न ते वन्द्याः कवीश्वराः ॥

**प्रश्न २ अधोलिखितयोः कश्चिदेकः प्रश्नः लेख्यः।** १०

१ हर्षचरितस्य साहित्यस्वरूपं स्पष्टयत ।

**अथवा**

२ हर्षचरितस्य प्रारम्भे निरूपिता पूर्व कविवन्दनां निरूपयत ।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ कस्याप्येकस्य गद्यखण्डस्य ससन्दर्भं व्याख्यां कुरुत ।** ५

१ ततो मर्षय भगवन् अभूमिरेषा शापस्य इत्यनुनाथ्यमानोऽपि विबुधैः, उपाध्याय, स्खलितमेकं क्षमस्व' इति बद्धाञ्जलिपुटैः प्रसाद्यमानोऽपि स्वशिष्यैः, पुत्रः, मा कृथास्तपसः प्रत्यूहम्' इति निवार्यमाणोऽप्यत्रिणा, रोषोवेशविवेशो दुर्वासाः दुर्विनीते, व्यपनयामि ते विद्याजनितामुन्नतिमिमाम् अधस्ताद्गच्छ मर्त्यलोकम् इत्युक्त्वा तच्छापोकदकं विससर्ज ।

२ सख त्रिभुवनोपदेशदानदक्षायास्तव पुरो जिह्वा जिह्रेति मे जल्पन्ती । जानास्येव यादृश्यो विसंस्थुला गुणवत्यपि जने दुर्जनवन्निर्दाक्षिण्याः क्षणभङ्गिन्यो दूरतिक्रमणीया न रमणीया दैवस्य वामा वृत्तयः। निष्कारणा च निकारकणिकापि कलुषयति मनस्विनोऽपि मानसमसदृशजनादापतन्ती ।

**प्रश्न ४ कस्याप्येकस्योत्तरं लिखित ।** १०

१ सावित्र्याः वर्णनं कुरुत।
२ सरस्वत्यवतरणप्रसङ्गं विवेचयन्तु।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ कस्याप्येकस्य गद्यखण्डस्य ससन्दर्भं विवेचनं कुरुत।** ५

१ श्रूयताम् – अयं खलु भूषण भार्गवंशस्य भगवतो भूर्भुवः स्वस्त्रितयतिलकस्य, अदभ्रप्रभावस्तम्भितजम्भारिभुजस्तम्भस्य, सुरासुरमुकुट-मणिशिला-शयनदुर्ललितपादपङ्करुहस्य, निजतेजः प्रसरप्लुष्टपुलोम्नश्च्यवनस्य बहिर्वृत्तिजीवितं दधीचो नाम तनयः।

२ सा त्ववादीत् – आर्य, श्रोष्यसि कालेन। भूयसो दिवसानत्र स्थातुमभिलषति नौ हृदयम्, अल्पीयाश्चायमध्वा। परिचय एव प्रकटयिष्यति। आर्येण न विस्मरणीयोऽयमनुषङ्गदृष्टो जनः, इत्यभिधाय तृष्णीमभूत्।

**प्रश्न ६ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ विकुक्षेः पात्रपरिचयं वर्णयत।
२ दधीचिवर्णनं कुरुत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ कस्याप्येकस्य गद्यखण्डस्य ससन्दर्भं विवेचनं कुरुत।** ५

१ अथ सरस्वती प्रीतिविस्कारितेन चक्षुषा प्रत्यवादीत् – अयि ! न शक्नोमि बहु भाषितुम्। एषास्मि ते स्मितवादिनि वचसि स्थिता। गृह्यन्ताममी प्राणाः इति। मालती तु 'देवि, यदाज्ञापयसि, अतिप्रसादाय' इति प्रहर्षपरवशा प्रणम्य प्रजविना तुरगेण ततार शोणम्।

२ तच्छ्रुत्वा पुनरपि सावित्री समभाषत 'अतिमहानुभावः खलु कुमारौ येनैवमविज्ञायमाने क्षणदृष्टेऽपि जने परिचितिमनुबन्धाति। तस्य हि गच्छतो यदृच्छया कथमप्यं शुकमिव मार्गलतासु मानसमस्मासु मुहूर्तमासक्तमासीत्। अशून्यं हि सौजन्यमाभिजात्येव वः स्वामिसूनोः।

**प्रश्न ८ कस्याप्येकस्योत्तरं लिखत।** १०

१ मालत्या वर्णनं कुरुत।
२ वात्स्यायनवंशस्य वैशिष्ट्यं वर्णयत।

**प्रश्न ९ निम्नलिखितेभ्यो दशप्रश्नानामुत्तराणि एकैक वाक्यैः लिखत।** १०

१ सरस्वत्याः सखी का ?
२ भासः केन यशो लेभे ?

३ बाणभट्टः कस्य नृपस्य आश्रितः आसीत् ।

४ बाणभट्टेन कानि काव्यानि विरचितानि ?

५ बाणभट्टस्य पितुः नाम किमासीत् ।

६ बाणभट्टस्य परं मित्रं भाषाकविः कः ?

७ सरस्वती पुत्राय किं वरं अदात् ?

८ सुनासीरशब्दस्य कोऽर्थः ?

९ हरिणिका का ?

१० अर्थपतेः पिता कः ?

११ महाकविः बाणभट्टः बृहत्कथायाः कां विशेषतां वर्णयति ?

१२ तरलयसि दृशं किमुत्सुकामकनुषमानसवासलालिते ।
अवतर कलहंसि वायिकां पुनरपि यास्यसि पङ्कजालयम् ॥ इत्यत्र किं छन्दः ?

१३ सतां कुलविद्या का ?

१४ नेयमाकृतिदिध्यतां व्यभिचरति इत्युक्तिः कस्य अस्ति ?

१५ दधीचि ऋषेः पिता कः ?